# आदर्श प्रश्नपत्र/ Model Que. Paper

## वेदविभूषण प्रथम-वर्ष / Vedavibhushan First Year/

## वर्ष / Year 2022-23

## विषय - वैदिक साहित्य का इतिहास/History of Vedic

**समुचितं विकल्पं चिनुत —** 32×2=64

प्र.1. ‘मन्त्रब्राह्मणयोः’ किं नामधेयम्

(क) वेदः (ख) धर्मः

(ग) विज्ञानम् (घ) देवः

प्र.2. वेदस्य चतुर्धा विभागकर्ता कः ?

(क) उवटाचार्यः (ख) वेदव्यासः

(ग) सायणाचार्यः (घ) भरतस्वामी

प्र.3. कः वेदः गद्यपद्यात्मकः?

(क) शुक्लयजुर्वेदः (ख) ऋग्वेदः

(ग) कृष्णयजुर्वेदः (घ) सामवेदः

प्र.4. प्रधानतया यज्ञानुष्ठानेन सम्बद्धः वेदः?

(क) सामवेदः (ख) यजुर्वेदः

(ग) ऋग्वेदः (घ) अथर्ववेदः

प्र.5. मण्डलक्रमेण ऋग्वेदे कति मण्डलानि सन्ति

(क) एकादश (ख) द्वादश

(ग) दश (घ) नव

प्र.6. सामवेदस्य शाखा काऽस्ति ?

(क)शाकलशाखा (ख) काण्वशाखा

(ग)जैमिनीयशाखा (घ) शौनकशाखा

प्र.7. खादिरगृह्यसूत्रेण सम्बद्धः वेदः कः?

(क) सामवेदः (ख) यजुर्वेदः

(ग) ऋग्वेदः (घ) अथर्ववेदः

प्र.8. तैत्तिरीयसंहितायां कति काण्डानि -

(क) दश (ख) विंशतिः

(ग) सप्त (घ) अष्टौ

प्र.9. गीतिरूपो वेदः कः ?

(क) सामवेदः (ख) यजुर्वेदः

(ग) ऋग्वेदः (घ) अथर्ववेदः

प्र.10. भैषज्यवेदः इति कस्य वेदस्य नामान्तरं विद्यते ?

(क) यजुर्वेदः (ख) सामवेदः

(ग) ऋग्वेदः (घ) अथर्ववेदः

प्र.11. अथर्ववेदस्य शौनकशाखायां कति काण्डानि -

(क) त्रिंशत् (ख) विंशतिः

(ग) चत्वारिंशत् (घ) पञ्चाशत्

प्र.12. अथर्ववेदीयं श्रौतसूत्रं किम् ?

(क) कात्यायनश्रौतसूत्रम् (ख) आर्षेयश्रौतसूत्रम्

(ग) वैतानश्रौतसूत्रम् (घ) बौधायनश्रौतसूत्रम्

प्र.13. कौषीतकिब्राह्मणं कस्य वेदस्य -

(क) सामवेदस्य (ख) अथर्ववेदस्य

(ग) शुक्लयजुर्वेदस्य (घ) ऋग्वेदस्य

प्र.14. कृष्णयजुर्वेदेन सम्बद्धं ब्राह्मणं किम् ?

(क) शतपथब्राह्मणम् (ख) तैत्तिरीयब्राह्मणम्

(ग) सामविधानब्राह्मणम् (घ) वंशब्राह्मणम्

प्र.15. 'कठोपनिषद्' केन वेदेन सम्बद्धा उपनिषत् ?

(क) शुक्लयजुर्वेदः (ख) सामवेदः

(ग) कृष्णयजुर्वेदः (घ) अथर्ववेदः

प्र.16. बृहदारण्यकोपनिषत् केन वेदेन सम्बद्धा उपनिषत्?

(क) सामवेदः (ख) शुक्लयजुर्वेदः

(ग) कृष्णयजुर्वेदः (घ) अथर्ववेदः

प्र.17. सामवेदस्य कति ब्राह्मणानि सन्ति ? -

(क) द्वौ (ख) त्रीणि

(ग) अष्ट (घ) दश

प्र.18. शतपथब्राह्मणे कति अध्यायाः सन्ति ?

(क) 100 अध्यायाः (ख) 105 अध्यायाः

(ग) 110अध्यायाः (घ) 107 अध्यायाः

प्र.19. उवटः कस्य वेदस्य भाष्यकारः ?

(क) शुक्लयजुर्वेदः (ख) सामवेदः

(ग) कृष्णयजुर्वेदः (घ) अथर्ववेदः

प्र.20. अथर्ववेदस्य किं ब्राह्मणम् अस्ति ? -

(क) आर्षेयब्राह्मणम् (ख) देवताध्यायब्राह्मणम्

(ग) गोपथब्राह्मणम् (घ) छान्दोग्यब्राह्मणम्

प्र.21. नासदीयसूक्तं कस्मिन् वेदे अस्ति ? -

(क) सामवेदे (ख) ऋग्वेदे

(ग) यजुर्वेदे (घ) अथर्ववेदे

प्र.22. यजुर्वेदस्य उपवेदः कोऽस्ति ?

(क) आयुर्वेदः (ख) धनुर्वेदः

(ग) गन्धर्ववेदः (घ) ब्रह्मवेदः

प्र.23. कस्य वेदस्य किमपि आरण्यकं नोपलभ्यते ?

(क) यजुर्वेदस्य (ख) अथर्ववेदस्य

(ग) सामवेदस्य (घ) ऋग्वेदस्य

प्र.24. निरुक्ते कति काण्डानि सन्ति ?

(क) दश (ख) त्रीणि

(ग) नव (घ) पञ्च

प्र.25. वेदस्य मुखस्थानीयं वेदाङ्गं किम् ?

(क) शिक्षा (ख) निरुक्तम्

(ग) व्याकरणम् (घ) छन्दः

प्र.26. ऋग्वेदस्य प्रथममण्डलस्य ऋषिः कः ?

(क) अत्रिः (ख) वामदेवः

(ग) मधुच्छन्दा (घ) महीदासः

प्र.27. पुरुरवा-उर्वशीसंवादसूक्तस्य ऋग्वेदे उल्लेखसंख्या का ?

(क) 10.95 (ख) 10.90

(ग) 10.75 (घ) 10.110

प्र.28. शांखायनशाखा कस्य वेदस्य ? -

(क) ऋग्वेदस्य (ख) यजुर्वेदस्य

(ग) अथर्ववेदस्य (घ) सामवेदस्य

प्र.29. सरमा-पाणिसंवादसूक्तस्य ऋग्वेदे उल्लेखसंख्या का ?

(क) 10.108 (ख) 10.105

(ग) 10.103 (घ) 3.33

प्र.30. ''याज्ञवल्क्य-शिक्षा' अस्ति -

(क) कृष्णयजुर्वेदस्य (ख) सामवेदस्य

(ग) शुक्लयजुर्वेदस्य (घ) अथर्ववेदस्य

प्र.31. पुरुषसूक्तस्य ऋग्वेदे उल्लेखसंख्या का ?

(क) 10.121 (ख) 10.90

(ग) 10.151 (घ) 10.125

प्र.32. विश्वामित्र-नदीसंवादसूक्ते कति मन्त्राः प्राप्यन्ते

(क) दश (ख) द्वादश

(ग) त्रयोदश (घ) नव

**लघूत्तरीयाः प्रश्नाः (हिन्दी भाषया अथवा संस्कृत भाषया लिखत )** 8×3=24

प्र.33. कृष्णयजुर्वेदस्य कति शाखाः उपलब्धाः ? काः च ताः?

________________________________________

________________________________________

________________________________________

________________________________________

प्र.34. वेदानाम् अपौरुषेयता विषये भारतीयमतानुसारं लिखत ।

________________________________________

________________________________________

________________________________________

प्र.35. भवतां विद्यालये कति वेदशाखाः सस्वरम् अध्याप्यन्ते, नामानि लिखत ।

________________________________________

________________________________________

________________________________________

प्र.36. ग्रामगेयगानेषु कति पर्वाणि भवन्ति ? नामानि लिखत ।

________________________________________

________________________________________

________________________________________

प्र.37. स्वशाखानुसारं गोत्रप्रवरसहितम् अभिवादनं लिखत ।

________________________________________

________________________________________

________________________________________

प्र.38. अथर्ववेदस्य उपलब्धशाखयोः नामनी के ?

प्र.39. आरण्यकेषु मुख्यं वर्ण्यविषयं लिखत ।

प्र.40. स्वाधीतवेदशाखायाः ऋषि-देवता-छन्दो-मन्त्रादिसंख्योल्लेखपुरस्सरं परिचयं लिखत ।

**दीर्घोत्तरीयाः प्रश्नाः (हिन्दी भाषया अथवा संस्कृत भाषया लिखत)** $2 \times 7 = 14$

**प्र.41.** ऋग्वेदसंवादसूक्तविषये संक्षेपेण लिखत । **अथवा** वेदानुसारं मन्त्रोल्लेखपुरस्सरं जलविषये संक्षेपेण लिखत

प्र. 42. स्ववेदशाखायाः चत्वारो मन्त्राः सस्वराः लेख्याः ।